# विष्णुपुराणसारः

प्रो. गङ्गाधर पण्डा

## प्रथमोऽशः

आदिकारणसर्गश्च देवादीनां च सम्भवः। समुद्रमन्थनाख्यानं दक्षादीनां कथाचयः।।
ध्रुवस्य चरितं चैव पृथोश्चरितमेव च। प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम्।।
पृथुराज्याधिकाराख्यं प्रथमोऽश इतीरितः।

## द्वितीयोंऽशः

पातालनरकाख्यानं सप्तसर्गनिरूपणम् । सूर्यादिचारकथनं पृथग्लक्षणसंगतम्।।
चरितं भरतस्याथ मुक्तिमार्गनिदर्शनम् । निदाघऋतुसंवादो द्वितीयोंऽश उदाहृतः।।

## तृतीयोंऽशः

मन्वन्तरसमाख्यानं वेदव्यासावतारकम् । नरकोद्धारकं कर्म गदितञ्च ततः परम्।।
सगरस्यौर्वसम्वादे सर्वधर्मनिरूपणम्। श्राद्धकल्पं तथोद्दिष्टं वर्णाश्रमनिबन्धने।।
सदाचारश्च कथितो मायामोहकथा ततः। तृतीयोंऽशऽयमुदितः सर्वपापप्रणाशनः।।

## चतुर्थोंऽशः

सूर्यवंशकथा पुण्या सोमवंशानुकीर्तनम्। चतुर्थेऽशे मुनिश्रेष्ठ नानाराजकथाचितम्।।

## पञ्चमोंऽशः

कृष्णावतारसंप्रश्नो गोकुलीया कथा ततः। पूतनादिवधो बाल्ये कौमारेऽघादिहिंसनम्।।
कैशोरे कंसहननं माथुरं चरितं तथा। ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा।।
सर्वदैत्यवधो यत्र विवाहाश्च पृथग्विधाः।। यत्र स्थित्वा जगन्नाथः कृष्णयोगेश्वरैश्वरः।।
भूभारहरणं चक्रे परस्वहननादिभिः। अष्टावक्रीयमाख्यानं पञ्चमोंऽश इतीरितः।।

## षष्ठोंऽशः

कलिजं चरितं प्रोक्तं चातुर्विधंतपस्यच। ब्रह्मज्ञान समुद्देशः खाण्डिक्यस्य निरूपितः।।
केशिध्वजेन चेत्येष षष्ठोंऽशः परिकीर्तितः।।

****